# Naradakritam Vishnu Stotram

# નારદકૃતં વિષ્ણુસ્તોત્રં

## Document Information

Text title : Naradakritam Vishnu Stotram

File name : nAradakRRitaMviShNustotraM.itx

Category : vishhnu, vishnu, stotra, varAhapurANa

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 3/11-20||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# નારદકૃતં વિષ્ણુસ્તોત્રં

નારદ ઉવાચ ।
પરં પરાણામમૃતં પુરાણં પારં પરં વિષ્ણુમનન્તવીર્યમ્ ।
નમામિ નિત્યં પુરુષં પુરાણં પરાયણં પારગતં પરાણામ્ ॥ ૧૧॥

પુરાતનં ત્વપ્રતિમં પુરાણં પરાપરં પારગમુગ્રતેજસમ્ ।
ગમ્ભીરગમ્ભીરધિયાં પ્રધાનં નતોઽસ્મિ દેવં હરિમીશિતારમ્ ॥ ૧૨॥

પરાત્પરં ચાપરમં પ્રધાનં પરાસ્પદં શુદ્ધપદં વિશાલમ્ ।
પરાત્પરેશં પુરુષં પુરાણં નારાયણં સ્તૌમિ વિશુદ્ધભાવઃ ॥ ૧૩॥

પુરા પુરં શૂન્યમિદં સસર્જ્જ તદા સ્થિતત્વાત્ પુરુષઃ પ્રધાનઃ ।
જને પ્રસિદ્ધઃ શરણં મમાસ્તુ નારાયણો વીતમલઃ પુરાણઃ ॥ ૧૪॥

પારં પરં વિષ્ણુમપારરૂપં પુરાતનં નીતિમતાં પ્રધાનમ્ ।
ધૃતક્ષમં શાન્તિધરં ક્ષિતીશં શુભં સદા સ્તૌમિ મહાનુભાવમ્ ॥ ૧૫॥

સહસ્રમૂર્ધાનમનન્તપાદમનેકબાહું શશિસૂર્યનેત્રમ્ ।
ક્ષરાક્ષરં ક્ષીરસમુદ્રનિદ્રં નારાયણં સ્તૌમ્યમૃતં પરેશમ્ ॥ ૧૬॥

ત્રિવેદગમ્યં ત્રિનવૈકમૂર્તિં ત્રિશુક્લસંસ્થં ત્રિહુતાશભેદમ્ ।
ત્રિતત્ત્વલક્ષ્યં ત્રિયુગં ત્રિનેત્રં નમામિ નારાયણમપ્રમેયમ્ ॥ ૧૭॥

કૃતે સિતં રક્તતનું તથા ચ ત્રેતાયુગે પૂતતનું પુરાણમ્ ।
તથા હરિં દ્વાપરતઃ કલૌ ચ કૃષ્ણીકૃતાત્માનમથો નમામિ ॥ ૧૮॥

સસર્જ યો વક્ત્રત એવ વિપ્રાન્ ભુજાન્તરે ક્ષત્રમથોરુયુગ્મે ।
વિશઃ પદાગ્રેષુ તથૈવ શૂદ્રાન્ નમામિ તં વિશ્વતનું પુરાણમ્ ॥ ૧૯॥

પરાત્પરં પારગતં પ્રમેયં યુધામ્પતિં કાર્યત એવ કૃષ્ણમ્ ।
ગદાસિચર્મણ્યભૃતોત્થપાણિં નમામિ નારાયણમપ્રમેયમ્ ॥ ૨૦॥

ઇતિ વરાહપુરાણે તૃતીયાધ્યાયાન્તર્ગતા નારદકૃતા વિષ્ણુસ્તુતિઃ સમાપ્તા ।

વરાહપુરાણ । અધ્યાય ૩/૧૧-૨૦ ॥

varAhapurANa . adhyAya 3/11-20..

Proofread by PSA Easwaran

---

*Naradakritam Vishnu Stotram*
pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*